## अग्नौ चेः । (९१/३००१)

[1]कर्मणि इत्येव । अग्नौ कर्मण्युपपदे चिनोतेर्धातोः क्विप् प्रत्ययो भवति । अग्निचित्, अग्निचितौ, अग्निचितः । अत्रापि पूर्ववच् चतुर्विधो नियम [2]इष्यते ॥

## कर्मण्यग्न्याख्यायाम् । (९२/३००२)

[3]चेः कर्मणि इति वर्तते । कर्मणि उपपदे चिनोतेः[4] कर्मण्येव कारके क्विप् प्रत्ययो भवति अग्न्याख्यायां, धातूपपद[5]प्रत्ययसमुदायेन चेदग्न्याख्या गम्यते । श्येन इव चीयते श्येनचित् । कङ्कचित्[6] । आख्याग्रहणं रूढिसम्प्रत्ययार्थम् । [7]अग्न्यर्थो हि इष्टकाचय उच्यते श्येनचित् इति ॥

## कर्मणीनिर्विक्रियः । (९३/३००३)

कर्मणि उपपदे विपूर्वात् क्रीणाते[8]र्धातोः इनिः प्रत्ययो भवति । कर्मणि इति वर्तमाने पुनः कर्मग्रहणं [9]कर्तुः कुत्सानिमित्ते कर्मणि यथा स्यात्, कर्ममात्रे मा भूत् । सोमविक्रयी । रसविक्रयी[10] । इह न भवति, [11]धान्यविक्रायः ॥

## दृशेः क्वनिप् । (९४/३००४)

कर्मणि [12]इत्येव । दृशेः [13]धातोः कर्मणि उपपदे क्वनिप् प्रत्ययो भवति । मेरुदृश्वा । परलोकदृश्वा । 'अन्येभ्योऽपि दृश्यन्ते' (३.२.७५/२९८०) इति क्वनिपि सिद्धे पुनर्वचनं प्रत्ययान्तरनिवृत्त्यर्थम् ॥

## राजनि युधिकृञः । (९५/३००५)

कर्मणि इत्येव । [14]राजन्शब्दे [15]कर्मणि उपपदे युध्यतेः करोतेश्च[16] क्वनिप् प्रत्ययो भवति । ननु च युधिरकर्मकः ? अन्तर्भावितण्यर्थः सकर्मको भवति । राजयुध्वा । राजानं योधितवान् इत्यर्थः । राजकृत्वा ॥

## सहे च । (९६/३००६)

[17]सहशब्दे चोपपदे [18]युधिकृञोः धात्वोः क्वनिप् प्रत्ययो भवति । असत्त्ववाचित्वान्नोपपदं कर्मणा विशेष्यते । सहयुध्वा । सहकृत्वा ॥

## सप्तम्यां जनेर्डः । (९७/३००७)

सप्तम्यन्त उपपदे जनेर्धातोः डः प्रत्ययो भवति । उपसरे [19]जातः उपसरजः । मन्दुरजः[20] ॥

---

1. वाक्यमिदं नास्ति फ. 2. इष्यते नास्ति फ. 3. चेः नास्ति फ. 4. धातोः इत्यधिकम् ब. 5. प्रत्यय नास्ति फ. 6. रथचक्रचित् इत्यधिकम् फ. 7. श्येनचित् इति समुदायेनाग्न्याधारस्थलविशेषः इष्टकाचयं उच्यते अ. 8. धातोः नास्ति फ. 9. कर्तृकुत्सा ह. 10. घृतविक्रयी इत्यधिकम् अ. ब. ड, तैलविक्रयी इत्यधिकम् ब. क. ड. ह. 11. धान्यविक्रयः ब. क. 12. इत्यनुवर्तते क. 13. धातोः नास्ति फ. 14. राजनि शब्दे ह. 15. कर्मवाचिनि ह. 16. धातोः इत्यधिकम् फ.ब. 17. कर्मणि इत्यधिकम् इ. 18. युधेः कृञश्च धातोः ब, युध्यतेः कृञश्च क. 19. जातवान् अ. ब. क. फ. 20. द्विर्जातो द्विजः इत्यधिकम् ह.